"आध्मानस्तम्भरौक्ष्यस्फुटनविमथनक्षोभकम्पप्रतोदाः कण्ठध्वंसावसादौ श्रमकविलपनं श्रंसमूलप्रभेदाः। पारुष्यं कर्णनादो विषमपरिणतिश्चंसदृष्टिप्रमोहा विस्पन्दोद्वेष्टनादिग्लपनमनशनं ताड़नं पीड़नञ्च ॥ नामोन्नामौ विषादो भ्रमपरिषदनं जृम्भणं रोमहर्षौ विक्षेपाक्षेपशोषग्रहणशुषिरता छेदनं वेष्टनञ्च। वर्णः श्यावोऽरुणो वा त्वड़पि च महती स्वापविश्लेषसङ्गा विद्यात् कर्म्माण्यमूनि प्रकुपितपवने स्यात् कषायो रसश्च" ॥ किञ्च "वदनविरसता स्याद्वचस: कर्कशत्वं भवति वपुषि कार्श्यं रात्रिनिद्रानिवृत्तिः। त्वचि च परुषता स्यात् स्याच्च वैषम्यमग्नेरिति पवनविकारे लक्षणं प्रोक्तमेतत्" ॥ तत्प्रशमनकारणम् यथा। "रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः। विपरीतगुणैर्द्रव्यैर्मारुतः संप्रशाम्यति" ॥ "स्निग्धोष्णस्थिरदृष्यबल्यलवणस्वाद्वम्लतैलातपस्नानाभ्यञ्जनवस्तिमांसमदिरासंवाहनोन्मर्द्दनैः। स्निग्धस्वेदनिरूहणोपशमनः स्नेहोपनाहादिकं पानाहारविहारभेषजमिदं वातं प्रशान्तं नयेत्" ॥ ऋतुभेदेन विहारादिना च तस्य प्रकोपप्रचयप्रशमाद्युक्तं यथा "ग्रीष्मे सञ्चीयते वायुः प्राट्काले प्रकुप्यति। प्रायेणोपशमं याति स्वयमेव समीरणः ॥ शरत्काले वसन्ते च पित्तं प्रावृट्तौ कफः। चयकोपशमान्दोषान् विहाराहार सेवनैः ॥ समानैर्यान्यकालेऽपि विपरीतैर्विपर्य्ययः" इति ॥ नरपतिजयचर्य्योक्तमनिलचक्रन्तु चक्रशब्दे वक्ष्यते। अनाहतचक्रस्थवायुमण्डलविवरणं तन्त्रोक्तं षट्चक्रशब्दे दृश्यम्। तद्देवताके स्वातिनक्षत्रे, अष्टवसुमध्ये पञ्चमे वसौ च। "धरोध्रुवः सोमनामा तथापोऽप्यनिलो नलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिता" इति विष्णुधर्म्मो० पुरा०। विष्णौ, तस्य प्राणात्मना सर्वदेहधारणात् तथात्वम् "अहः संवर्त्तको वह्निरनिलो धरणीधर" इति विष्णु० स०। शरीरस्थे धातुभेदे च। तस्य विवरणमुक्तप्रायम्। "पित्तं पङ्गुः कफः पङ्गुः पङ्गवो मलधातवः। वायुना यत्र नीयन्ते तत्र वर्षन्ति मेघवत् ॥ वायुरायुर्बलं वायुर्वायुर्धाता शरीरिणाम्। वायुर्विश्वमिदं सर्वं प्रभुर्व्वायुः प्रकीर्त्तितः ॥ वाह्यमण्डलचक्रेषु यथा राजा प्रशस्यते। तथा शरीरमध्येऽपि वायुरेकः परो विभुरिति" वैद्यकम् ॥ दोषधातुमलादीनां नेता शीघ्रः समीरणः ॥ रजोगुणमयः सूक्ष्मो रूक्षशीतो लघुश्चलः ॥ उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः। सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥ अनुग्रह्णात्यविकृतो हृदयेन्द्रियचित्तधृक्। खरो मृदुर्योगवाही संयोगादुभयार्थकृत्। दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥ विभागकरणाद्वायुः प्रधानं दोषसंग्रहैः ॥ पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ॥ स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः" इति।

**अनिलघ्नक** पु० अनिलं वातरोगं हन्ति हन्+क ततः संज्ञायां कन्। (वयड़ा) इति ख्याते वृक्षे तत्फलस्य हि वातनाशकत्वम्।

**अनिलसख** पु० अनिलस्य वायोः सखा टच्। वह्नौ। अनिलबन्ध्वादयोऽप्यत्र "मघा विशाखानिलबन्ध्विति" ज्योति०।

**अनिलान्तक** पु० अनिलो वातरोगस्तस्यान्तकः अन्तं करोतीति अन्त+णिच्—ण्वुल्। (जीयापुति) इति ख्याते वृक्षे।

**अनिलामय** पु० अनिलकृत आमयः शाक०त०। वातरोगे।

**अनिवर्त्तिन्** त्रि० न निवर्त्तते नि—वृत—णिनि न०त०। कार्य्यान्तमगत्वा अनिवृत्ते। संग्रामेष्वनिवर्त्तिनामिति" रामा० न निवर्त्तते कुतश्चेत् अलुप्तशक्तिकत्वात् ईश्वरे, विष्णौ च पु० संग्रामादनिवर्त्तित्वात्तथात्वमु "अनिवर्त्ती निवृत्तात्मेति" विष्णुसहस्रनाम।

**अनिविशमान** त्रि० न निविशमानः। निवेशनरूपस्थितिशून्ये सर्वदा गन्तरि, "पुनाना यत् मन्त्रानिविशमाना" इति ऋ० ७,४६,१, अनिविशमानाः सर्वदा गच्छन्त्य इति भाष्यम्।

**अनिश** त्रि० निशा तद्धेतुकत्वेनोपचारात् चेष्टाविनाशः सा नास्ति यस्य ब०। अविरते, निरन्तरे, सदाभये वस्तुनि, रात्रिवर्ज्जिते च। "तदुभयोरनिशं हि विरोधिता कथमहो समता मम तापने" इत्युद्भटः।

**अनिशम्** न निशेतेऽत्र नि+शी—बा० डमु न०त०। सातत्ये स्वरादेराकृतिगणत्वेन तस्य तत्र पाठ इति मौ०म०।

**अनिश्शस्त** त्रि० निर्+शन्सु—क्त न०त०। अनिन्दिते "न वोऽतीदृषामानिःशस्ता" इति ऋ० ४,२४,११, "अनिशस्ता अनिन्दिता" इति भा०।

**अनिष्ट** त्रि० इष—क्त विरोधे न०त०। इष्टस्य सुखादेर्विरोधिनि प्रतिकूलवेदनीये दुःखे, तत्साधने-पापे, विषादौ, अपकारे च। "इष्टनाशादनिष्टाप्तेः करुणाख्यो रसोभवेदिति सा०द०। "ध्यायत्यनिष्टं तत्सर्वं पाणिग्राहस्य चेतसेति" "एवं यद्यप्यनिष्टेषु वर्त्तन्ते" इति अनिष्टं वा प्यानिष्टेषु तं धर्म्मं न विचालयेदिति" मनु-